# অবধূতাষ্টকং স্বামীশুকদেবস্তুতিঃ চ

{॥ অবধূতাষ্টকম্ ॥}

শ্রী পরমাত্মনে নমঃ ॥

অথ পরমহংস শিরোমণি-অবধূত-শ্রীস্বামীশুকদেবস্তুতিঃ

নির্বাসনং নিরাকাঙ্ক্ষং সর্বদোষবিবর্জিতম্ ।

নিরালম্বং নিরাতঙ্কং হ্যবধূতং নমাম্যহম্ ॥ ১॥

নির্মমং নিরহঙ্কারং সমলোষ্টাশ্মকাঞ্চনম্ ।

সমদুঃখসুখং ধীরং হ্যবধূতং নমাম্যহম্ ॥ ২॥

অবিনাশিনমাত্মানং হ্যেকং বিজ্ঞায তত্ত্বতঃ ।

বীতরাগভযক্রোধং হ্যবধূতং নমাম্যহম্ ॥ ৩॥

নাহং দেহো ন মে দেহো জীবো নাহমহং হি চিত্ ।

এবং বিজ্ঞায সন্তুষ্টম্ হ্যবধূতং নমাম্যহম্ ॥ ৪॥

সমস্তং কল্পনামাত্রং হ্যাত্মা মুক্তঃ সনাতনঃ ।

ইতি বিজ্ঞায সন্তুষ্টং হ্যবধূতং নমাম্যহম্ ॥ ৫॥

জ্ঞানাগ্নিদগ্ধকর্মাণং কামসঙ্কল্পবর্জিতম্ ।

হেয়োপাদেয়হীনং তং হ্যবধূতং নমাম্যহম্ ॥ ৬॥

ব্যামোহমাত্রবিরতৌ স্বরূপাদানমাত্রতঃ ।

বীতশোকং নিরায়াসং হ্যবধূতং নমাম্যহম্ ॥ ৭॥

আত্মা ব্রহ্মেতি নিশ্চিত্য ভাবাভাবৌ চ কল্পিতৌ ।

উদাসীনং সুখাসীনং হ্যবধূতং নমাম্যহম্ ॥ ৮॥

স্বভাবেনৈব যো যোগী সুখং ভোগং ন বাঞ্ছতি ।

যদৃচ্ছালাভসন্তুষ্টং হ্যবধূতং নমাম্যহম্ ॥ ৯॥

নৈব নিন্দাপ্রশংসাভ্যাং যস্য বিক্রিয়তে মনঃ ।

আত্মক্রীডং মহাত্মানং হ্যবধূতং নমাম্যহম্ ॥ ১০॥

নিত্যং জাগ্রদবস্থায়াং স্বপ্নবদ্যোঽবতিষ্ঠতে ।

নিশ্চিন্তং চিন্ময়াত্মানং হ্যবধূতং নমাম্যহম্ ॥ ১১॥

দ্বেষ্যং নাস্তি প্রিয়ং নাস্তি নাস্তি যস্য শুভাশুভম্ ।

ভেদজ্ঞানবিহীনং তং হ্যবধূতং নমাম্যহম্ ॥ ১২॥

জডং পশ্যতি নো যস্তু জগত্ পশ্যতি চিন্ময়ম্ ।

নিত্যযুক্তং গুণাতীতং হ্যবধূতং নমাম্যহম্ ॥ ১৩॥

যো হি দর্শনমাত্রেণ পবতে ভুবনত্রযম্ ।

পাবনং জঙ্গমং তীর্থং হ্যবধূতং নমাম্যহম্ ॥ ১৪॥

নিষ্কলং নিষ্ক্রিযং শান্তং নির্মলং পরমামৃতম্ ।

অনন্তং জগদাধারং হ্যবধূতং নমাম্যহম্ ॥ ১৫॥

॥ ইতি অবধূতাষ্টকং সমাপ্তম্ ॥

Encoded and proofread by Subrahmanyam Yvs yvspmp at gmail.com, NA

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org


Avadhuta Ashtakam ( Shuka Deva Stuti ) Lyrics in Bengali PDF
% File name : avadhUtAShTakam.itx
% Category : aShTaka
% Location : doc_deities_misc
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Subrahmanyam Yvs yvspmp at gmail.com
% Proofread by : Subrahmanyam Yvs yvspmp at gmail.com, NA
% Latest update : May 23, 2015
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 15, 2015 ] at Stotram Website